# Shri Bhuvaneshwari Hridayam

# શ્રીભુવનેશ્વરીહૃદયમ્

## Document Information

Text title : Bhuvaneshwari Hridayam

File name : bhuvaneshvarIhRidayam.itx

Category : hRidaya, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Description-comments : Mantramaharnava nIlasarasvatItantre bhuvaneshvarIpaTale

Latest update : August 12, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Shri Bhuvaneshwari Hridayam

# શ્રીભુવનેશ્વરીહૃદયમ્

શ્રીગણેશાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।

દેવ્યુવાચ ।
ભગવન્ બ્રૂહિ તત્સ્તોત્રં સર્વકામપ્રસાધનમ્ ।
યસ્ય શ્રવણમાત્રેણ નાન્યચ્છ્રોતવ્યમિષ્યતે ॥ ૧॥

યદિ મેઽનુગ્રહઃ કાર્યઃ પ્રીતિશ્ચાપિ મમોપરિ ।
તદિદં કથય બ્રહ્મન્ વિમલં યન્મહીતલે ॥ ૨॥

ઈશ્વર ઉવાચ ।
શ ૃણુદેવિ પ્રવક્ષ્યામિ સર્વકામપ્રસાધનમ્ ।
હૃદયં ભુવનેશ્વર્યાઃ સ્તોત્રમસ્તિ યશોદયમ્ ॥ ૩॥

વિનિયોગઃ ।
ૐ અસ્ય શ્રીભુવનેશ્વવરીહૃદયસ્તોત્રમન્ત્રસ્ય શક્તિરૃષિઃ ।
ગાયત્રી છન્દઃ । શ્રીભુવનેશ્વવરી દેવતા ।
હકારો બીજમ્ । ઈકારઃ શક્તિઃ । રેફઃ કીલકમ્ ।
સકલમનોવાઞ્છિતસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥ પાઠે
હૃદયાદિષડઙ્ગન્યાસઃ ॥

ૐ હ્રીં હૃદયાય નમઃ ।
ૐ શ્રીં શિરસે સ્વાહા ।
ૐ ઐં શિખાયૈ વષટ્ ।
ૐ હ્રીં કવચાય હું ।
ૐ શ્રીં નેત્રત્રયાય વૌષટ્ ।
ૐ ઐં અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

કરન્યાસઃ ॥

ૐ હ્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ શ્રીં તર્જનીભ્યાં નમઃ ।
ૐ ઐં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રીં અનામિકાભ્યાં નમઃ ।
ૐ શ્રીં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ઐં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

અથ ધ્યાનમ્ ।
ધ્યાયેદ્બ્રહ્માદિકાનાં કૃતજનિજનનીં યોગિનીં યોગયોનિં
દેવાનાં જીવનાયોજ્જ્વલિતજયપરજ્યોતિરુગ્રાઙ્ગધાત્રીમ્ ।
શઙ્ખં ચક્રં ચ બાણં ધનુરપિ દધતીં દોશ્ચતુષ્કામ્બુજાતૈર્માયામાદ્યાં
વિશિષ્ટાં ભવભવભુવનાં ભૂભવા ભારભૂમિમ્ ॥ ૪॥

ઇતિ ધ્યાનમ્ ॥

યદાજ્ઞયેદં ગગનાદ્યશેષં સૃજત્યજઃ શ્રીપતિરૌરસં વા ।
var યદાજ્ઞયા યો જગદાદ્યશેષં
બિભર્તિ સંહન્તિ ભવસ્તદન્તે ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૫॥

જગજ્જનાનન્દકરીં જયાખ્યાં યશસ્વિનીં યન્ત્રસુયજ્ઞયોનિમ્ ।
જિતામિતામિત્રકૃતપ્રપઞ્ચાં ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૬॥

હરૌ પ્રસુપ્તે ભુવનત્રયાન્તે અવાતરન્નાભિજપદ્મજન્મા ।
વિધિસ્તતોઽન્ધે વિદધાર યત્પદં ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૭॥

ન વિદ્યતે ક્વાપિ તુ જન્મ યસ્યા ન વા સ્થિતિઃ સાન્તતિકીહ યસ્યાઃ ।
ન વા નિરોધેઽખિલકર્મ યસ્યા ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૮॥

કટાક્ષમોક્ષાચરણોગ્રવિત્તા નિવેશિતાર્ણા કરુણાર્દ્રચિત્તા ।
સુભક્તયે એતિ સમીપ્સિતં યા ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૯॥

યતો જગજ્જન્મ બભૂવ યોનેસ્તદેવ મધ્યે પ્રતિપાતિ યા વા ।
તદત્તિ યાન્તેઽખિલમુગ્રકાલી ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૦॥

સુષુપ્તિકાલે જનમધ્યયન્ત્યા યયા જનઃ સ્વપ્નમવૈતિ કિઞ્ચિત્ ।
પ્રબુદ્ધ્યતે જાગ્રતિ જીવ એષ ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૧॥

દયાસ્ફુરત્કોરકટાક્ષલાભાન્નૈકત્ર યસ્યાઃ પ્રલભન્તિ સિદ્ધાઃ ।
કવિત્વમીશિત્વમપિ સ્વતન્ત્રા ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૨॥

લસન્મુખામ્ભોરુહમુત્સ્ફુરન્તં હૃદિ પ્રણિધ્યાય દિશિ સ્ફુરન્તઃ ।
યસ્યાઃ કૃપાર્દ્રં પ્રવિકાશયન્તિ ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૩॥

યદાનુરાગાનુગતાલિચિત્રાશ્ચિરન્તનપ્રેમપરિપ્લુતાઙ્ગાઃ ।
સુનિર્ભયાઃ સન્તિ પ્રમુધ યસ્યાઃ ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૪॥

હરિર્વિરઞ્ચિર્હર ઈશિતારઃ પુરોઽવતિષ્ઠન્તિ પ્રપન્નભઙ્ગાઃ ।
યસ્યાઃ સમિચ્છન્તિ સદાનુકૂલ્યં ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૫॥

મનું યદીયં હરમગ્નિસંસ્થં તતશ્ચ વામશ્રુતિચન્દ્રસક્તમ્ ।
જપન્તિ યે સ્યુર્હિ સુવન્દિતાસ્તે ભજામહે શ્રીભુવનેશ્વરીં તામ્ ॥ ૧૬॥

પ્રસીદતુ પ્રેમરસાર્દ્રચિત્તા સદા હિ સા શ્રીભુવનેશ્વવરી મે ।
કૃપાકટાક્ષેણ કુબેરકલ્પા ભવન્તિ યસ્યાઃ પદભક્તિભાજઃ ॥ ૧૭॥

મુદા સુપાઠ્યં ભુવનેશ્વરીયં સદા સતાં સ્તોત્રમિદં સુસેવ્યમ્ ।
સુખપ્રદં સ્યાત્કલિકલ્મષઘ્નં સુશૃણ્વતાં સમ્પઠતાં પ્રશસ્યમ્ ॥ ૧૮॥

એતત્તુ હૃદયં સ્તોત્રં પઠેદ્યસ્તુ સમાહિતઃ ।
ભવેત્તસ્યેષ્ટદા દેવી પ્રસન્ના ભુવનેશ્વરી ॥ ૧૯॥

દદાતિ ધનમાયુષ્યં પુણ્યં પુણ્યમતિં તથા ।
નૈષ્ઠિકીં દેવભક્તિં ચ ગુરુભક્તિં વિશેષતઃ ॥ ૨૦॥

પૂર્ણિમાયાં ચતુર્દશ્યાં કુજવારે વિશેષતઃ ।
પઠનીયમિદં સ્તોત્રં દેવસદ્મનિ યત્નતઃ ॥ ૨૧॥

યત્રકુત્રાપિ પાઠેન સ્તોત્રસ્યાસ્ય ફલં ભવેત્ ।
સર્વસ્થાનેષુ દેવેશ્યાઃ પૂતદેહઃ સદા પઠેત્ ॥ ૨૨॥

॥ ઇતિ નીલસરસ્વતીતન્ત્રે ભુવનેશ્વરીપટલે શ્રીદેવીશ્વરસંવાદે
શ્રીભુવનેશ્વવરી હૃદયસ્તોત્રં સમાપ્તમ્ ॥

॥ ઇતિ શ્રીમન્ત્રમહાર્ણવે મધ્યખણ્ડે ભુવનેશ્વરીતન્ત્રે સપ્તમતરઙ્ગઃ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay

*Shri Bhuvaneshwari Hridayam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*